| Semester | NAME OF THE COURSE (फलितज्यौतिषम्) | CREDIT | UNITS | Source | Objectives & Outcomes |
|---|---|---|---|---|---|
| 8 | DSCC-18<br>(Total Credit-4) | 1 | संहितास्वरूपम्, सांवत्सरसूत्रम्, आदित्यचन्द्रराहुचाराध्यायाः च | **आधारग्रन्थः-**<br>**बृहत्संहिता**<br>सहायकग्रन्थाः-<br>१.भद्रबाहुसंहिता<br>२.अद्भुतसागरः,<br>३.नारदसंहिता | **अस्य पाठस्य उद्देश्यानि –**<br>• ज्योतिश्शास्त्रस्य संहितास्कन्धस्य परिचयप्राप्तिः ।<br>• दैवज्ञस्य लक्षणानां रव्यादिग्रहचारफलानां च परिज्ञानम् ।<br>• सप्तर्षिचारवशतः केतूनाम् उद्गमात् च लोकानां शुभाशुभफलज्ञानम् ।<br>• नक्षत्रकूर्मविभागादिना देशेषु भूकम्पयुद्धादिफलविवेकः ।<br>• वृष्टिविज्ञानस्य साकल्येन अध्ययनम् ।<br>**फलितांशः-**<br>अस्याध्ययनेन छात्रः संहितास्कन्धे प्रवेशं प्राप्नोति। दैवज्ञस्य गुणान् अधिगत्य, तान् गुणान् स्वजीवने अवाप्तुं प्रयासं करिष्यति। रव्यादीनां ग्रहाणां सञ्चारवशात्, तेषां बिम्बानां वर्णभेदात्, ग्रहणात् तथा चन्द्रस्य संस्थान-ग्रास-मोक्षवशात्, कुजस्य मुखवशात्, बुधस्य गतिविशेषवशात्, गुरोः संवत्सरवशात्, शुक्रस्य विथी-मार्ग-मण्डलवशात् च फलानि यानि प्रोक्तानि तेषां निर्धारणे कुशलो भवति। ग्रहाणां नक्षत्राणां च सम्बद्धानां विषयाणां ज्ञानं प्राप्य तेषां वृद्धिः हानिर्वा केन कारणेन भवतीति निश्चेतुं समर्थः भवति। चक्र-चाप-त्रिकोणादिग्रहसंस्थाद्वारा, संवर्त-समागम-सम्मोह-समाज-सन्निपात-कोशाख्यग्रहशृङ्गाटकभेदेन च लोकानां कीदृशानि शुभाशुभफलानि भवन्तीति निर्देष्टुं पटुः भवति। |
| | | 1 | कुजादिग्रहचाराः सप्तर्षिचारः च | | |
| | | 1 | नक्षत्रकूर्म-नक्षत्रव्यूह-ग्रहभक्ति-ग्रहयुद्धविचाराः | | |
| | | 1 | ग्रहशृङ्गाटक-गर्भलक्षण-धारण-प्रवर्षणविचाराः | | |
| | DSCC-19<br>(Total Credit-4) | 1 | केश-ललाट-भ्रू-नेत्र-नासिकालक्षणानि मसूरिका-आनन-ओष्ठ-दन्त-स्वर-ग्रीवा-कृकाटिका-स्कन्ध-हृदय-बाहु-हस्ताङ्गुलिलक्षणानि च | **आधारग्रन्थः –**<br>सचित्रसामुद्रिकरहस्यम्<br>सहायकग्रन्थौ-<br>१.भावकुतूहलम्<br>२.बृहत्पराशरहोरा | **अस्य पाठस्य उद्देश्यानि –**<br>• ज्योतिश्शास्त्राङ्गभूतस्य सामुद्रिकशास्त्रस्य परिचयप्राप्तिः ।<br>• शरीरावयवानां लक्षणाधारेण शुभाशुभफलज्ञानम् ।<br>• शरीराङ्गेषु तिलादिचिह्नवशात् शुभाशुभत्वविवेचनम् ।<br>• मृग-पद्मिन्यादिपुंस्त्रीविशेषसंज्ञानां तत्फलानां च अध्ययनम् ।<br>• हस्तगतरेखाणां चिह्नविशेषाणां च सफलं विवेचनम् ।<br>**फलितांशः-**<br>अस्याध्ययनेन छात्रः सादुद्रिकशास्त्रे प्रवेशं प्राप्नोति। जातकफलेन सह फलसंवादप्राप्त्यर्थं शरीरलक्षणाधारितफलानामपि अध्ययनं कर्तव्यमिति अवगच्छति। शरीरावयवानां तथाविधत्वे प्राग्जन्मनः कर्मविशेषः एव कारणमिति स्फुटं ज्ञानं प्राप्नोति। |
| | | 1 | मणिबन्ध-करतल-नख-अङ्गुष्ठ-आयू-रेखालक्षणानि। वलि-नाभि-पृष्ठ-कटि-गुह्य-ऊरू-पादलक्षणानि, प्रमदालक्षण-विशेषाः,शरीरप्रमाणम्,विशेषाङ्गशुभा-शुभवर्णनम्, तिलमशकलक्षणानि च। | | |
| | | 1 | मृगतुरगादिपुरुषलक्षणानि पद्मिनीचित्रिण्यादिस्त्रीलक्षणानि च | | |
| | | 1 | करतले रेखालक्षणानि फलानि च । | | |
| | DSCC-20<br>(Total Credit-4) | 1 | अंश-पिण्ड-जीव-निसर्ग-लग्नायुस्साधनम्, परमायुर्विचारः (सोदाहरणम् अभ्यासः) | **आधारग्रन्थाः**<br>**१.केशवीयजातकपद्धतिः** | **अस्य पाठस्य उद्देश्यानि –**<br>• आयुर्दायदशायाः वैशिष्ट्यज्ञानम् । |

| | | | | | |
|---|---|---|---|---|---|
| | | 1 | आरोहिणी-अवरोहिणीदशानिर्णयः,<br>लग्नसूर्यचन्द्रबलानुसारं दशाक्रमनिर्णयः, तत्र दशाक्रमबलं रिष्टकररिष्टहरबलं च।<br>अन्तर्दशाक्रमविचारः, विदशादिविचारः, दशाप्रवेशकालिक-लग्नसाधनम्, दशाशुभाऽशुभत्वं च।<br>(सोदाहरणम् अभ्यासः) | **२.लघुपाराशरी**<br>**३.बृहत्पराशरहोराशास्त्रम्**<br>**४.भावकुतूहलम्,**<br><br>सहायकग्रन्थाः –<br>१.श्रीपतिपद्धतिः<br>२.जातकपारिजातः<br>३.फलदीपिका<br>४.बृहज्जातकम् | • अंशादीनाम् आयुर्दायानां गणनाक्रमस्य अवगमनम्।<br>• दशासंज्ञाविशेषाणां तत्फलानां च अध्ययनम्।<br>• दशान्तर्दशाक्रमनिर्णयस्य अन्तर्दशागणितस्य च ज्ञानम्।<br>• दशाप्रवेशकालिकलग्नवशात् दशायाः शुभाशुभत्वविमर्शः।<br>• केन्द्राधिपत्यादिदोषविमर्शक्रमज्ञानम्<br>• वर्गविशेषाणाम् अवगमनम्<br>• ग्रहावस्थाज्ञानं तत्फलचिन्तनक्रमज्ञानं च<br>• अष्टकवर्गविवेकः<br>**फलितांशः-**<br>पर्वम् आयुर्दायदशादीनां स्थूलरूपेण अध्ययनं सम्पन्नमासीत्, सम्प्रति विशेषाध्ययनमत्र भवति। अस्याध्ययनेन छात्रः अंशादिचतुर्विधायुर्दायानां साधनं गणितद्वारा कर्तुं समर्थः भवति। कस्मिन् बलिष्ठे सति कः आयुर्दायः ग्राह्यः इति स्फुटं ज्ञानं भवति। ग्रहस्थितिविशेषेण आयुषः वृद्धिह्रासक्रमः, प्राणिनां परमायुर्विचारः, जन्मकुण्डलीरचनाकाले एव तत्तद्दशारम्भकालस्य कुण्डलीं निर्माय शुभाशुभफलचिन्तनक्रमः इत्येतेषु अंशेषु छात्रः निष्णातः भवति। तथैव कुण्डल्यां केन्द्राधिपत्यवशात् दोषाः कथं भवन्तीति वक्तुं समर्थः भवति, वर्गविशेषवशात् फलचिन्तनं कथं कर्तव्यमिति ज्ञास्यति, ग्रहावस्थाविशेषेण फलभेदः कथं भवतीति सम्यक् प्रतिपादयितुं च शक्तः भवति। |
| | | 1 | केन्द्राधिपत्यदोषमारकेशादिविचारः – (लघुपाराशरी)<br>दशवर्गविचारः षोडशवर्गविचारः, ग्रहाणां विंशोपकबलसाधनं च | | |
| | | 1 | ग्रहाणां शयनाद्यवस्थाः , जाग्रताद्यवस्थाः बालाद्यवस्थाः, दीप्ताद्यवस्थाः च<br>अष्टकवर्गविचारः च | | |